श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ३

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

**प्रो. अर्कनाथः चौधरी**

सम्पादकौ

**डॉ. ललितकुमारः पटेलः**

**डॉ. जानकीशरणः आचार्यः**

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी**
**वेरावलम्**

**प्रकाशकः -**

**डॉ. दशरथः जादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

**समन्वयकः -**

**डॉ. कार्तिकपण्ड्या**
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2017*

**प्रथमं संस्करणम्** - जनवरी - २०१७

**प्रतयः** - ३५०

**ISBN** - 978-93-83097-19-7

**मूल्यम्** - रु. २५०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# साधनचतुष्टयविमर्शः

✍ डॉ. जानकीशरणः आचार्यः

**उपक्रमः -**

ज्ञानार्थकाद् दृश् धातोः करणार्थे "करणाधिकरणयोश्च"[1] इति सूत्रेण करणेऽर्थे ल्युट्प्रत्यये सति दर्शनशब्दस्य सिद्धिर्भवति । अस्य दर्शनशब्दस्य अर्थो विद्यते–तच्छास्त्रं येन शास्त्रेण यथार्थतत्त्वस्य ज्ञानं भवति । तच्छास्त्रं विद्यते वेदान्तादिशास्त्रम् । दर्शनशब्दस्य वेदान्तादिशास्त्रम् इत्यर्थः कथं लभ्यत इति चेदुच्यते–दृश्यते=ज्ञायते यथार्थतत्त्वं येन शास्त्रेण तद्दर्शनम् । ज्ञानैनेव हि सर्वं विचारयितुं शक्यते । तत्त्वज्ञानार्जने व्यापृताः शान्तचित्ता जितेन्द्रिया दिव्यचक्षुषो निखिलपदार्थजातं करतलामलकवत् प्रत्यक्षीकुर्वाणा विवेकविचारशीला मानवसमुदायस्य श्रेयसे कल्याणकामनया च यानि तत्त्वानि याँश्च सिद्धान्तान् ज्ञानप्राप्तिसाधनभूतान् आविर्भावयामासुः तानि दर्शनानि इति व्यवह्रियन्ते । एवञ्च दर्शनमिति नाम्ना प्रसिद्धं शास्त्रं तत्त्वज्ञानादेव प्रारब्धमिति । तच्च तत्त्वज्ञानं केनचित् साधनेन भवति, तस्य साधनविशेषस्य प्रदर्शनम्, अपि च तेन साधनेन तत्त्वज्ञानं कीदृशं भवति इत्युभयं तत्तद्दर्शनेन भवति । सर्वा अपि दर्शनसरण्यः तत्त्वसमीक्षार्थमेव खलु प्रवर्तन्ते । तथापि तासां सर्वासां चिन्तनविधिर्भिन्नः । किञ्च तत्त्वाधिगमोऽपि भिन्न एव प्रतीयते । तथापि तत्तद्दर्शनग्रन्थपरिशीलनकाले जायते काचिद्विलक्षैव श्रद्धा । एवञ्च तथ्यातथ्यविवेचनपुरस्सरं परमपुरुषार्थं साधयन्ति दर्शनानि । तत्रापि भारतीयदर्शनसमवाये मुकुटमणिपदवीमुपगच्छति ब्रह्माद्वैतसिद्धान्तः । द्वैतनिषेधेन भवत्यद्वैतसिद्धिः[2], अद्वैतमतं समाश्रित्य प्रणिनाय भाष्यं भगवच्छङ्कराचार्यः ।

ननु किमेतदद्वैतमिति पदं ? कं वा अर्थविशेषं प्रकाशयति खल्वेषोऽद्वैतशब्दः । उच्यते–द्वाभ्यामितं द्वीतम् (द्वि+इत=द्वीत)। द्वीतस्य भावो द्वैतम् (द्वीत+अण्=द्वैत)[3]। न विद्यते द्वैतं यस्मिन् इति अद्वैतम् । एवञ्चाद्वैतशब्दस्य द्वैतनिषेधे तात्पर्यम् । जीवजगद्भासितं विशिष्टं ब्रह्मैव द्वीतम्, तस्य भावो द्वैतम् । ब्रह्मणो जीवजगद्भेदं विशिष्टत्वं ये नानुमन्यन्ते त एवाद्वैतिनः । तथा चात्र सुरेश्वरवार्तिकम्-



**द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते ।**
**तन्निषेधेन चाद्वैतं प्रत्यग् वस्त्वभिधीयते ॥**[5] इति ।

शुद्धं चैतन्यमेवाद्वैततत्त्वम्, चैतन्यस्य च प्रत्यक्त्वेनात्र अभिधानम् ।

**अनुबन्धः-**

परम्परानुसारेण शास्त्रस्य ग्रन्थस्य वा आरम्भे अनुबन्धाः प्रतिपाद्यन्ते । अनुबन्ध इति शब्दः अनु-उपसर्गपूर्वकात् बन्ध् धातोः भावार्थे घञ्प्रत्यये सति निष्पद्यते, यस्य च व्युत्पत्तिलभ्योऽर्थो भवति–अनु स्वज्ञानाद् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसञ्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः इति । अर्थात् यस्य ज्ञानानन्तरं ज्ञाता कस्मिँश्चिच्छास्त्रे ग्रान्थे वा प्रवर्तते, स अनुबन्धः इत्युच्यते । यदि अनु-उपसर्गपूर्वकात् बन्ध् धातोः करणार्थे घञ्प्रत्ययः क्रियते तर्हि अनुबन्ध इत्यस्य अर्थो भवति–अनुबध्यते शास्त्रं यैस्ते अनुबन्धाः । अत एवोक्तम् अभियुक्ततरैः-

**ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥**[6] इति।

अधिकारिविषयसम्बन्धप्रयोजनरूपम् अनुबन्धचतुष्टयम् । शास्त्रादौ एतदनुबन्धचतुष्टयं निर्णेयं भवति, अन्यथा शास्त्रे प्रवृत्तिर्न स्यात् । अतो भट्टपादैरपि उक्तम्–

**सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।**
**यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ॥**

अत एव विषयप्रयोजनादीनां शास्त्रारम्भप्रयोजकत्वाद्धेतुत्वम् । तत्र स्वार्थप्रतिपत्तारम् अनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगात् आदौ अधिकारी अपेक्षितः । तस्य च अधिकारिणो विषयबोधमन्तरेण अप्रवृत्तेः विषयस्य तदानन्तर्यम् । विषयस्य च शक्यप्रतिपाद्यत्वसिद्धये सम्बन्धस्य विषयाद् आनन्तर्यम्। प्रयोजनस्य च चरमत्वं प्रसिद्धम् ।

एवं वेदान्ते अनुबन्धचतुष्टयं प्रसिद्धम् । अनुबन्धचतुष्टये सर्वप्रथमं भवति अधिकारी । वेदान्तसारे अधिकारिलक्षणम् "**अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता**" इत्युक्तम् । अर्थात्

साधनचतुष्टयसम्पन्न एव श्रवणादौ अधिकारीति सर्ववेदान्तसम्मतम् । श्रवण-मनन-निदिध्यासनानि च ब्रह्मानुभवसाधनानि । अत्र साधनचतुष्टयसम्पन्न प्रमाता अधिकारीत्युक्तं तत्र किं तत् साधनचतुष्टयम् इत्यत्र किञ्चित् प्रस्तूयते ।

**''अथातो ब्रह्मजिज्ञासा'' इति सूत्रार्थविचारः -**

ब्रह्मसूत्रेषु शास्त्रारम्भसूत्रमिदं पठ्यते- ''**अथातो ब्रह्मजिज्ञासा**[८]'' इति । अथ अतः ब्रह्मजिज्ञासा इति त्रिपदात्मकं सूत्रमिदम् । तत्र अथशब्दस्य अर्थः आनन्तर्यमेव । यद्यपि ''**मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ**[९]'' इति कोषवाक्येन अथशब्दस्य हि मङ्गलम्, आनन्तर्यम्, आरम्भः, प्रश्नः, कृत्स्नत्वम् इत्येते अर्थाः ज्ञायन्ते[१०]। प्रकृतसूत्रे अथशब्दस्य आरम्भार्थकत्वं तावत् नैव सम्भवति। ज्ञानेच्छारूपाया जिज्ञासाया मानसिकत्वात् आरम्भो हि नैव सम्भवति[११]। क्रिया हि लोके आरब्धुं शक्यते ।

तर्ह्यत्र अथशब्दो मङ्गलार्थकस्स्यादिति चेत्—न ।[१२] अत्र मङ्गलार्थकत्वमपि वक्तुं न शक्यते । तथा च मङ्गलहेतुत्वात् प्रत्यहं ब्रह्मजिज्ञासा कर्त्तव्या इत्येवं वाक्यार्थे उच्यमाने आकाङ्क्षायाः समन्वयाभावात् ।[१३] वाक्यघटकपदार्थस्यैव वाक्यार्थे अन्वयो भवति । स च वाच्यो वा लक्ष्यो वा । न चेह अथशब्दस्य मङ्गलमित्यर्थो वाच्यो वा लक्ष्यो वा । पदस्य वाच्यभूतार्थस्यैव लक्ष्यभूतार्थस्यैव वा वाक्यार्थे समन्वयो भवति न तु पदस्य कार्यज्ञाप्ययोः इति शब्दव्यवहारः । ग्रन्थारम्भे मङ्गलरूपस्य अर्थस्य कर्तव्यत्वेऽपि मङ्गलार्थकत्वं न वक्तव्यम् । अर्थान्तरे हि प्रयुक्तस्यापि अथशब्दस्य श्रवणेनैव मङ्गलरूपप्रयोजनं सिद्धं भवति ।[१४] अपि च पक्षान्तरपरिग्रहरूपोऽर्थः अत्र स्वीकर्तुं न शक्यते। तस्यापि अर्थस्य फलतः आनन्तर्यरूपत्वात् । प्रश्नः कृत्स्नत्वं वा अर्थः अत्र वक्तुं नैव शक्यते । अतः अत्र अथशब्दस्य आनन्तर्यमेवार्थः ।

अथशब्दस्य आनन्तर्यार्थस्वीकारे कस्य अनन्तरमिति प्रश्नो भवति । तदा उच्यते– ब्रह्मजिज्ञासा स्वस्मात् पूर्वं नियमेन स्थितं यत् अपेक्षते तस्य अनन्तरम् इति वक्तव्यम् । तादृशं चास्त्यत्र साधनचतुष्टयमेव।

अत्रेयं शङ्का–अथशब्दस्य आनन्तर्यार्थिकत्वं निर्णीतम् । आनन्तर्यस्य प्रतियोगी कः इति जिज्ञासायां साधनचतुष्टयसम्पत्तिः प्रतियोगित्वेन सिद्धान्त्यते । किन्तु वेदेषु प्रथमतः कर्मकाण्डम् उक्त्वैव खलु ज्ञानकाण्डं प्रवर्तते। अतः अत्र धर्मजिज्ञासां कृत्वा ब्रह्मजिज्ञासा तदनन्तरं भवतु इति ।



अत्रेवं समाधीयते–एवं तदा स्वीकर्तुं शक्यते यदा धर्मजिज्ञासां विना ब्रह्मजिज्ञासा नैव उत्पद्येत । प्रकृते तु अधीतवेदान्तस्य पुरुषधौरेयस्य पूर्वपुण्यवशात् ब्रह्मजिज्ञासा उत्पद्यमाना दृश्यते । अपि च धर्मब्रह्मजिज्ञासयोः पौर्वापर्यं श्रुत्या न विवक्षितम् । यत्र तु क्रमो विवक्षितः तत्र पौर्वापर्येण आनन्तर्यनियमोऽस्ति । यथा ''**हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः**''[१५] इत्यत्र क्रमो विवक्षितः । क्रमस्य कथनाभावेऽपि यदि अनयोर्जिज्ञासयोः अङ्गाङ्गित्वे प्रमाणं स्यात् तदा पौर्वापर्यं भवेत् । अङ्गत्वबोधकं षड्विधं प्रमाणमपि प्रकृते नास्ति । किञ्चान्यत् धर्मब्रह्मजिज्ञासयोः फलमपि अत्यन्तं भिन्नं वर्तते । धर्मजिज्ञासायां जन्मान्तरलभ्यम् अनुष्ठानसाध्यं स्वर्गादिफलं भवति । ब्रह्मजिज्ञासायां तु अनुभवसमकालमेव कार्यनिरपेक्षं सिद्धं फलमनुभूयते । धर्मफलं तारतम्ययुक्तं, ब्रह्मज्ञानफलं तु एकरूपम् । अथ यो धर्मो जिज्ञास्यो भवति स ज्ञानकाले नास्ति, बाह्यप्रयत्नसाध्यो वर्तते । अनुष्ठानेन हि धर्मस्य निष्पत्तिर्भवति, इत्यतः पुरुषव्यापारतन्त्रो भवति धर्मः । अत्र तु ब्रह्मजिज्ञासायां ब्रह्म ज्ञानकालेऽपि सिद्धं वर्तत इत्यतः पुरुषव्यापारस्य गन्धमात्रेणापि प्रवेशो नास्ति। वस्तुतन्त्रं ह्यदो ब्रह्मज्ञानम् ।

अपि च धर्मब्रह्मणोः बोधनप्रकारोऽपि पृथक् वर्तते । या चोदना धर्मस्य प्रमाणं सा पुरुषं प्रवर्तयन्ती एव पुरुषमवबोधयति। तत्र लिङादीनां श्रवणैः पुरुषः चोदितस्सन् प्रवर्तते । ब्रह्मजिज्ञासायां तु ब्रह्मप्रतिपादकानि वाक्यानि केवलं शुद्धं ब्रह्म अवबोधयन्ति । अतोऽत्र प्रवर्तनाया नियोगापरपर्यायाया लेशतोऽपि अवकाशो नास्ति । एवञ्च अनयोर्जिज्ञासयोः पौर्वापर्यं स्वीकर्तुं न शक्यते । अतः ब्रह्मजिज्ञासा पूर्ववृत्तां धर्मजिज्ञासां नैवापेक्षते । तस्माद् ब्रह्मजिज्ञासा स्वस्मात् पूर्वं नियमेन स्थितं यदपेक्षते तस्य अनन्तरम् इति वक्तव्यम् । तदेवोक्तं भामत्यां-''**यस्मिन्नसति ब्रह्मजिज्ञासा न भवति सति तु भवन्ती भवत्येव**[१६]'' इति । तच्च साधनचतुष्टयमेवास्ति ।

अथोऽथ अथातो ब्रह्मजिज्ञासा इति सूत्रे अथशब्दस्य आनन्तर्यार्थकत्वं व्यवस्थाप्य सूत्रार्थो वर्ण्यते–अथ=साधनचतुष्टयसम्पादनानन्तरम्, अतः=साधनचतुष्टय-सम्भवात्, ब्रह्मजिज्ञासा=ब्रह्मविचारः कर्तव्यः इति । अत्र ज्ञानेच्छा[illegible]चिना जिज्ञासाशब्देन इच्छाज्ञानयोर्मध्ये अवश्यप्राप्तो विचारः उपलक्ष्यते । इच्छा हि स्वविषयसिद्ध्यर्थं यत्नं कृतिञ्च सम्पादयति । अतः ज्ञानेच्छा स्वविषयस्य ज्ञानस्य प्राप्तये ज्ञानप्राप्त्यनुकूलं विचारम् अवश्यम् आक्षिपति । तस्मात् साधनचतुष्टयसम्पादनानन्तरं ब्रह्मजिज्ञासा कर्तव्या इति सूत्रार्थः ।

साधनचतुष्टये स्वर्गादौ कथं वैराग्यस्य सम्भव इति द्योतनार्थं सूत्रे अतः इतिशब्दः

प्रयुक्तः । अतशब्दः हेत्वर्थः । तथा हि लोके यत् कृतकं तदनित्यम् इति न्यायेन क्रियाजन्यस्य अनित्यत्वमवगम्यते ।[१७] तथैव स्वर्गादीनामपि क्रियाजन्यत्वात् सस्यादीनामिव अनित्यत्वमेव । अत एव उपनिषदि **"तद्यथा इह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते[१८]"** इत्युक्तम् । ब्रह्मज्ञानेन तु नित्यपरमपुरुषार्थप्राप्तिरित्यपि श्रुत्या उक्तम्- **"ब्रह्मविदाप्नोति परम्[१९]"** इत्यनया । अतः वैराग्यसम्भवात् साधनचतुष्टयसम्पत्तिः अवश्यं भवति ।

साधनचतुष्टये चत्वारि साधनानि भवन्ति[२०], तद्यथा-

१. नित्यानित्यवस्तुविवेकः,

२. इहामुत्रार्थफलभोगविरागः,

३. शमादिषट्कसम्पद्,

४. मुमुक्षुत्वञ्च ।

अत्र विवेकादिसाधनेषु क्रमेण एतानि साधनानि भवन्ति । विवेकाद्वैराग्यसिद्धिः, वैराग्येण शमादिसम्पदो भूमिः सिद्ध्यति, शमादिसम्पत्त्या मुमुक्षुत्वसिद्धिर्भवति । अतः ब्रह्मसाक्षात्काराय इमानि साधनानि सोपानरूपेण कार्यं कुर्वन्ति एतेषां साधनानां याथायथं विवेचनमधः प्रस्तूयते ।

**१. नित्यानित्यवस्तुविवेकः-**

तत्र नित्यानित्यवस्तुविवेकः इति प्रथमं साधनम् ।[२१] विवेकमन्तरेण वैराग्यसिद्धिर्न भवति । विवेकात् खलु इदम् उपादेयम्, इदं हेयमिति विवेचनमन्तरेण हेयाद्रागात् निवृत्तिः सम्भवति । अत्र नित्यानित्यवस्तुविवेकः इति समस्तं पदम् । अस्य विग्रहो द्वेधा क्रियते वेदान्तविद्भिः । प्रथमं तावत् नित्यं च अनित्यं च इति नित्यानित्ये (इतरेतरयोगद्वन्द्वसमासः), नित्यानित्ये च ते वस्तुनी च=नित्यानित्यवस्तुनी (कर्मधारयः), नित्यानित्यवस्तुनोर्विवेकः=नित्यानित्यवस्तुविवेकः (षष्ठी तत्पुरुषः) इति । अत्र नित्यवस्तुशब्देन प्रत्यगात्मा, अनित्यवस्तुशब्देन देहेन्द्रियादिविषया बोध्यन्ते । अनयोर्द्वयोः नित्यानित्यवस्तुनोः विवेकः अर्थात् भेदनिश्चयो नित्यानित्यवस्तुविवेकः इति अस्य विग्रहस्याशयः ।

विग्रहोऽयं भामतीकारानभीष्टः ।[२२] तेषामयमाशयः-इदं भेदज्ञानं निश्चयात्मकं, भ्रमात्मकम् उत संशयात्मकम् ? भेदज्ञानस्य निश्चयात्मकत्वस्वीकारे तस्य फलीभूतब्रह्मावबोधस्य प्रागेव सत्त्वात् ब्रह्मजिज्ञासा न सम्भवति । अथ विवेकशब्देन ज्ञानमात्रं



स्वीक्रियते चेत्तद् भ्रमात्मकं संशयात्मकं वा स्यात्। तथा च भ्रमात्मकं वा संशयात्मकज्ञानं न वैराग्यं भावयेत्, अभावयन् कथं ब्रह्मजिज्ञासाहेतुः ? तस्मात् नित्यानित्यवस्तुविवेकः इत्यस्य विग्रहो भामतीकारैः एवं क्रियते-नित्यश्च अनित्यश्च=नित्यानित्ये (इतरेतरयोगद्वन्द्वसमासः), नित्यानित्ययोः वस्तूनि=नित्या-नित्यवस्तूनि (षष्ठी तत्पुरुषः), नित्यानित्यवस्तूनां विवेकः=नित्यानित्यवस्तुविवेकः (षष्ठी तत्पुरुषः) । विग्रहेणानेन अयमर्थः सिद्ध्यति-यः धर्मः नित्यवस्तुषु अनित्यवस्तुषु च आश्रयेण तिष्ठति, तस्य भेदज्ञानं नित्यानित्यवस्तुविवेकः इति । एवञ्च **"नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः[२३]"** । स च आपाततोऽधिगतवेदार्थस्य अनुमानकुशलस्य ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमचेतनमनित्यमिति विवेकरूपेण भवति । अत्र वसति यत् तद् वस्तु इति व्युत्पत्त्या वस्तु इति शब्दस्य धर्मः इत्यर्थः स्वीक्रियते । इदं कीदृक् साधनम् इति जिज्ञासायामुच्यते-**ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति२४** । ब्रह्मणो नित्यत्वं तद्भिन्नस्य च अनित्यत्वं तावच्छ्रुतिस्मृतिभिः प्रतिपाद्यते । तद्यथा-

**"नित्यं विभुं सर्वगतं सुसूक्ष्मम[२५]"** ।

**"अजो नित्यः शाश्वतोऽयं पुराणः[२६]"** ।

**"आकाशवत् सर्वगतश्च नित्यः[२७]"** ।

**"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः[२८]"** इत्यादयः ;

ब्रह्मभिन्नवस्तूनां **"नेह नानास्ति किञ्चन[२९] अतोऽन्यदार्तम्[३०]"** इत्यादिश्रुतिभिः अनित्यत्वं प्रतिपाद्यते । एवञ्च नित्यत्वं नाम सत्यत्वम् । तद्यस्यास्ति तन्नित्यं सत्यं, तथा च आस्थागोचरः उपादेयश्च । अनित्यत्वम् असत्यत्वं, तद्यस्यास्ति तदनित्यमनृतम् । तथा च अनास्थागोचरः अनुपादेयश्च ।

**२. इहामुत्रार्थफलभोगविरागः-**

अयं विवेको वैराग्यं जनयति । तस्य च लक्षणमुक्तम् - **"इहामुत्रार्थफलभोगविरागः[३१]"** इति । अर्थ्यते प्रार्थ्यते इत्यर्थः। अत्र अर्थपदं फलवाच्यम् । तस्मिन् विरागः अर्थात् अनाभोगात्मिका उपेक्षाबुद्धिः। वैराग्यस्य प्रतिपादनावसरे भगवच्छङ्कराचार्यैः गीताभाष्ये विषयाणां द्वैविध्यमुक्तं (१) दृष्टविषयाः, (२) अदृष्टविषयाश्च । तद्यथा- **"वैराग्यं विरागभावो दृष्टादृष्टविषयेषु[३२]"** इति । इहामुत्रार्थफलभोगविरागः इत्यत्र इहलोके भवा ऐहिकाः प्रतिपन्नशरीरसम्बन्धिनः स्रक्चन्दनवनितागृहक्षेत्रपशुभृत्यादिविषयजन्यसुखरूपा भोगा दृष्टविषयाः, आमुष्मिका अमृतादिविषयाः अदृष्टविषयाः ।

अयं नित्यानित्यवस्तुविवेकः कथं वैराग्यं जनयति इति शङ्कायाम् उच्यते–यन्नित्यं तदेव सुखम्, यत्तु अनित्यं तद् दुःखम् । दुःखजनकत्वाद् दुःखस्वरूपत्वाद्वा उभयमपि दुःखमेव । अस्माकं सुखे एव इच्छा वर्तते, दुःखे इच्छा न वर्तते। सुखं मे निरतिशयं भूयाद्दुःखं मे मा भूदणुमात्रमपि इति अखिलप्राणिनामस्त्यभिनिवेशः । तर्हि यत्सुखं तदेव अपेक्षितम्, यत् असुखं तन्नापेक्षितम् इति । एवं नित्यानित्यवस्तुविवेकः अर्थात् सुखासुखविवेक इति सिद्धम् । सुखासुखविवेके च सम्पन्ने अयं पुरुषः असुखात् विरज्यते ।

अत्र एवं शङ्का भवितुमर्हति यत् ऐहिकं सुखमनित्यत्वादिदोषदूषितत्वात् विरागास्पदं भवति तथापि यज्ञादिभिः प्राप्तात् पारलौकिकात् सुखात् कथं विरक्तिः उपपद्यते? यतो हि श्रूयते स्वार्गादिफलस्य अमृतत्वम् । **''अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति[33]'', ''अपाम सोमममृता अभूम[34]''** इत्यादिश्रुतयः स्वर्गस्य अमृतत्वं द्योतयन्ति खलु ।

अत्र समाधीयते–मैवम् । **''तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते''** इति श्रुत्या कर्मजन्यस्य स्वर्गादिसुखस्यापि अनित्यत्वं द्योत्यते । अस्याम् अमृतत्वबोधिकाश्रुतौ अमृतत्वस्य आशयः चिरकालस्थायित्वं, सुदीर्घकालस्थायित्वम् इत्यस्ति ।[35] तदेवोक्तं भगवद्गीतायामपि-**''ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति[36]''** इति । विष्णुपुराणेऽपि अयमेवार्थः उक्तः–**''आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते । त्रैलोक्यस्थितिकालोऽयमपुनर्मार उच्यते[37]''** इति । लोके यथा कृषिसेवाप्रतिग्रहादिकर्मजन्या अनित्या यथा दृष्टा एवम् आमुष्मिका अप्यमृतादिविषयसेवाजन्यानन्दा यागादिकर्मजन्यत्वादनित्या भवितुमर्हन्तीति निश्चयो भवति । तदेवोक्तं वेदान्तसारस्य व्याख्यायां विद्वन्मनोरञ्जन्यां– **''न हि जन्यं नित्यं भावरूपं दृष्टमत ऐहिकभोगवदेवाब्रह्मस्तम्बपर्यन्तेषु भोगेषु वैराग्यमुपपद्यते[38]''** । तदुक्तं भगवता व्यासेन-

**यच्च कामसुखं लोकेयच्च दिव्यं महत्सुखम् ।**
**तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥** इति ।

एवं दृष्टादृष्टविषयेषु वैराग्यं द्वितीयं साधनं सम्पन्नम् ।

**३. शमादिषट्कसम्पत्तिः–**

वैराग्येण सम्पन्नोऽयं पुरुषश्शमदमादिसाधनसम्पत्तिमान् भवति । वैराग्यचक्रे षट्



अरा वर्तन्ते । एते अरा यदा परिभ्रमन्ति तदा वैराग्यचक्रम् अग्रे गच्छति । शमादिषट्केषट् सम्पत्तयो वर्तन्ते । ताश्च सन्ति-शमः, दमः, उपरतिः, तितिक्षा, समाधानं, श्रद्धा च ।[40]

तत्र **शमः**- शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः । अर्थात् विषयग्रामे दोषान् दृष्ट्वा तेषु विषयेषु मनसो निग्रहं कृत्वा तस्य श्रवणादिषु विनियोगश्शम इत्युच्यते । तदेवोक्तं विवेकचूडामणौ-

**विरज्य विषयव्राताद् दोषदृष्ट्या मुहुर्मुहुः ।**
**स्वलक्ष्ये नियतावस्था मनसश्शम उच्यते ॥** इति ।

शमस्तावत् मनसो निग्रहः इत्युक्तं[42] परं मनसो निग्रहः अत्यन्तं दुष्करं वर्तते । तथापि अभ्यासवैराग्याभ्यां तस्य निग्रहः कर्तुं शक्यते । अतः श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन अर्जुनमुखादेतदेव प्रश्नमुद्भाव्य तस्य समाधानमित्थमुक्तम् -

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**
**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**[43]

**दमः**[44] - बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् अर्थात् इन्द्रियाणां विषयेभ्यः परावर्तनं कृत्वा स्वस्वगोलकेषु स्थापनं दम इत्युच्यते । उक्तञ्च भगवत्पादेन श्रीमच्छङ्कराचार्येण–

**विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ।**
**उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ॥**[45] इति ।

बाह्येन्द्रियाणां श्रोत्रादीनां ज्ञानकरणानां, वागादीनां कर्मकरणानां च स्वतस्तत्र सामर्थ्याभावात् प्रग्रहस्थानीयेन मनसा अश्वस्थानीयानां बहिरिन्द्रियाणां शब्दादिरूपविषममार्गेभ्यः पराङ्मुखीकृत्य स्वस्वगोलकेकर्णशष्कुलीवदनादिदेशेषु स्थापनं उपरतव्यापारतासम्पादनं यत् स दमः परिकीर्तितः । अर्थात् ज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्त्यन्ते स दम इत्यर्थः । वस्तुतः इन्द्रियाणि अतीव बलवन्ति भवन्ति, तानि बलपूर्वकं मनो विषयान् प्रति नयन्ति । विषयसम्पर्केण च मनः अशान्तं भवति मनसः अशान्तत्वे बुद्धिः अशान्ता भवति ।[46] अतः आत्मसाक्षात्काराय दमस्य आवश्यकता वर्तते । महाभारतेऽपि दमस्य प्रशंसा कृता वर्तते–

**दमस्तेजो वर्धयति पवित्रं च दमः परम् ।**
**विपाप्मा तेजसा युक्तः पुरुषो विन्दते महत् ॥**[४८]

**उपरतिः** - वेदान्तसारे उपरतेः द्वे लक्षणे उक्ते । प्रथमं तावत् (१) निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः । द्वितीयं तु (२) विहितानां कर्मणां विधिना परित्यागः । श्रवणादिविषयेभ्यो मनसो बाह्येन्द्रियाणाञ्च निवर्तनं पुनर्विषयप्रवृत्त्यनुत्साहकरणेन स्थिरीकरणम् उपरतिः इत्युच्यते । अर्थात् निगृहीतानां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छेयुस्तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः । यद्यपि उपरतेः लक्षणमदरशमदमयोर्लक्षणाभ्यां गतार्थं भवति तथापि इयमुपरतिः शमदमयोः उत्तरभूमिः वर्तते।

उपरतेः अपरं लक्षणं **"विहितानां कर्मणां विधिना परित्यागः"** इत्युक्तम् । अर्थात् अवश्यकर्तव्यतया चोदितानां सन्ध्यावन्दनाग्निहोत्रादीनां कर्मणां विधिपूर्वकं श्रुतिस्मृत्युक्तमार्गेण परित्यागः परिव्रजनं सन्न्यासः उपरतिरित्यर्थः । अत्र विहितकर्मणां विधिपूर्वकत्यागस्य सन्न्यास इति सञ्ज्ञा वर्तते । सन्न्यासग्रहणस्य विधिस्तु श्रुतिस्मृतौ इत्थं वर्णितोऽस्ति-

**"तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति**[४९]**"**
**"प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् ।**
**आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ॥**[५०]**"**
**"असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।**
**नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति ॥**[५१]**"**
**"त्वम्पदार्थविचाराय सन्न्यासः सर्वकर्मणाम् ।**[५२]**"** इति ।

**तितिक्षा** - "शीतोष्णादिद्वन्द्वसहिष्णुता तितिक्षा[५३]" इत्युक्तं वेदान्तसारे । शरीरधर्मस्य शीतोष्णादिद्वन्द्वानां शरीरेण, तज्जन्यसुखदुःखादेश्च मनसा ग्रहणं क्रियते । अतस्तेषां स्वप्रकाशचिद्रूपे स्वात्मनि अत्यन्ताभावो वर्तत इति विवेकदीपेन मिथ्याभूतस्य शीतोष्णादेर्द्वन्द्वस्य यत्सहनं क्रियते सा तितिक्षा इत्यर्थः । अर्थात् शीतोष्ण-मानापमान-लाभालाभ-शोकहर्षादीनां द्वन्द्वानां तपोरूपेण सहनं तितिक्षा इति निगद्यते[५४] । कम्बलव्यजनादिभिः शैत्यौष्णादिदुःखप्रतीकारस्तु लोकप्रसिद्धः । किन्तु तादृशसामग्र्यभावेऽपि किमस्माभिर्दीनैः करणीयमिति चिन्ताविलापरहितं यत्सहनं सैव



तितिक्षा इत्यर्थः । तदेवोक्तं भगवद्गीतायाम्-

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।**
**आगमापायिनोऽनित्यास्ताँस्तितिक्षस्व भारत ॥**[५५] इति।

**श्रद्धा** - गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा इति कथ्यते । लोकेऽपि दृश्यते यत् कश्चिज्जनः आप्तवक्ये विश्वासाभावे तदनुसारेण विचारादौ नैव प्रवर्तते, किमुतातीन्द्रिये शास्त्रार्थे । अतः आत्मसाक्षात्काराय श्रद्धा परमकारणम् । उक्तं हि गीतायाम् -

**अश्रद्धानाः पुरुषा धर्मस्यास्य परन्तप ।**
**अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥**[५६] इति ।

अतः गुरूपदिष्टवेदान्तवाक्येभ्यः नासि त्वं संसारी किन्तु नित्यशुद्धबुद्धमुक्तस्वभावं परं ब्रह्मैव अन्यत्सर्वं मिथ्या इत्यादिवाक्येभ्यः सत्यबुध्यवधारणे श्रद्धा आवश्यकी वर्तते[५७]-

**शास्त्रस्य गुरुवाक्यस्य सत्यबुध्यावधारणा।**
**सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते।।**[५८] इति
विवेकचूडामणौ भगवत्पादेन न्यगादि ।

अतः गुरु-वेदान्त-स्मृति-इतिहास-पुराणवाक्येषु विश्वास इदमित्थमेव नान्यथेति नियता या बुद्धिः सा श्रद्धा इत्यर्थः ।

**समाधानम्** - एतादृशश्रद्धावत एव समाधानं सम्यक् सिद्ध्यतीति तदनन्तरं समाधानस्य लक्षणमुच्यते - **"निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्"** इति । समाधानस्यार्थः ऐकाग्र्यं तत्परत्वं वा भवति । उक्तञ्च विवेकचूडामणौ–

**सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।**
**तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥**[५९] इति ।

वस्तुतस्तु शुद्धे ब्रह्मणि सर्वथा सर्वदा च बुद्धिस्थापनमेव समाधानम् । यद्यपि स्वलक्ष्ये ईदृशं समाधानं शमद्वारा अपि भवति तथापि **"यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततो नियम्यैतत् आत्मन्येव वशं नयेत् ॥**[६०]**"** इति गीतोक्तरीत्या शमावस्थायां मनसः स्थिरीकरणे सङ्कल्पविकल्पात्मकस्य प्रयत्नस्य आवश्यकता वर्तते । अत्र तु अध्यवसायात्मिकाया बुद्धेः शुद्धे ब्रह्मणि सम्यगास्थापनं सर्वदा भवति इत्यनेन अन्तःकरणस्य सङ्कल्पविकल्पविनिर्मुक्तत्वं कथितं भवति ।

इयं षट्सम्पद् ब्रह्मविचारस्य आवश्यकपृष्ठभूमित्वेन वर्तते। अत एवोक्तं कठोपनिषदि-

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥**[६१] इति।

एव शमदमादि षट् साधनानि अस्य नित्यानित्यविवेकसाधनद्वारा वैराग्यसम्पन्नस्य भवति। इन्द्रियनिग्रहादिसाधनजातं यदा उत्पन्नं भवति तदा अस्य पुरुषस्य मुमुक्षुत्वं सम्पद्यते।

### ४. मुमुक्षुत्वम् -

इदं चरमं साधनं वर्तते। एतादृशसाधनमण्डितस्यैव शमादिसम्पत्तिमत्पुरुषस्यैव मुमुक्षुत्वं सम्भवति। तत्र मोक्षो नाम विद्यानिरस्ताविद्यातत्कार्यब्रह्मात्मनावस्थानम्। तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमित्यर्थः।[६२] विवेकचूडामणावास्य वर्णनमित्थं वर्तते–

**अहङ्कारादिदेहान्तान् बन्धानज्ञानकल्पितान्।**
**स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता॥**[६३] इति।

ईश्वरानुग्रहेणैव इदं मुमुक्षुत्वं सिद्ध्यति। न केवलं विशिष्टफलकत्वादेव मोक्षस्य माहात्म्यं वर्तते, किन्तु तस्य दुर्लभत्वमपि वर्तते। यतो हि असङ्ख्येषु हि जीवसङ्घेषु मनुष्यातिरिक्तानां श्रेयसि प्रवृत्तेरभावात् प्रथमं तावत् मनुष्यत्वमेव दुर्लभम्। सत्यपि मनुष्यत्वे न सर्वोऽपि ज्ञानाय प्रवर्तते। किन्तु सहस्रेषु अनन्तेषु[६५] कश्चिदेव महासुकृती। अतः तत्त्वज्ञानसाधनानुष्ठायी दुर्लभतरः। सत्यपि तत्त्वज्ञानसाधनानुष्ठातरि तत्सहस्रेषु कश्चिदेव तत्त्वतो वेत्तीति सिद्धो ज्ञानी दुर्लभतमः। एतदेव न्यरूपि भगवता श्रीमद्भगवद्गीतायाम्।[६६]

इयं तावत् मुमुक्षुता त्रिविधा–मन्दा मध्यमा प्रवृद्धा चेति। इयं मोक्षेच्छा यदा प्रवृद्धा भवति तदैव फलदा प्रसूता भवति। शमादिसाधनानां सिद्ध्यर्थं तीव्रवैराग्यस्य तीव्रमुमुक्षुत्वस्य च आवश्यकता वरीवर्ति। अतः तत्प्रवृद्ध्यर्थं विषयवैराग्यशमादिषट्क-गुरुप्रसादलाभार्थं प्रयत्नः कर्तव्यः।[६७] यत्र तु एतयोः वैराग्यमुमुक्षयोः मन्दत्वं भवति तत्र शमादिफलं मरुमरीचिकावत् व्यर्थं भवति। यथा निदाघसमये मरुभूमौ चण्डकिरणसम्पर्के दूरस्थस्य पुरुषस्य तत्र जलमस्तीति भ्रान्तिर्भवति किन्तु तत्र जलार्थं गमने न जललाभो वा नैव पिपासानिवृत्तिर्भवति, प्रत्युत श्रान्तस्य श्रमाधिक्यमेव भवति। तथैव तीव्रवैराग्य-मुमुक्षत्वयोरभावे मरुसलिलवत् शमादेस्तत्र भानमात्रता भवति, न तु



शमादिफललाभः।

इत्थं साधनचतुष्टयं ब्रह्मजिज्ञासायाः पुष्कलकारणमिति अधिगम्यते, यस्मिन्नसति ब्रह्मजिज्ञासा न भवति, सति तु भवन्ती भवत्यैव ब्रह्मजिज्ञासा। अथ मुमुक्षुत्वेन सम्पन्नः पुरुषो जिज्ञासायां सत्यां स्वयमेव ब्रह्मविचारे प्रवृत्तो भवति, विचारेण च आत्मानं सम्यक् ज्ञातुं प्रवर्त त इति शम्।

***

## पादटिप्पणयः

१. अष्टाध्यायी ३.३.११७
२. "तत्राद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम्।"
- अद्वैतसिद्धिः, पृ. ८८
३. द्विधा इतं द्वीतं तस्य भावः स्वार्थे वा अण् इति। - वाचस्पत्यम्, तृतीयो भागः, पृ. ३८३०
४. द्विधा इतं द्वीतं तस्य भावः द्वैतं भेदः अभावार्थे नञ्तत्पुरुषसमासः
- वाचस्पत्यम्, प्रथमो भागः, पृ. ११९
५. बृहदारण्यकभाष्यवार्तिकम्, ४.३.१८०७
६. वाचस्पत्यम् (प्रथमो भागः), पृ. १७९; शब्दकल्पद्रुमः (पञ्चमकाण्डः) पृ. २८४
७. श्लोकवार्तिकम्, १.१२
८. ब्रह्मसूत्रम्, १.१.१
९. अमरकोषः, ३.२४७
१०. आरम्भार्थे-अथैव ज्योतिः (ताण्ड्यब्राह्मणम्, १६.८.१)
अधिकारार्थे- "अथ योगानुशासनम्" (पातञ्जलयोगसूत्रम्, १.१); "अथ शब्दानुशासनम्" (महाभाष्यम्, पृ. ५)
आनन्तर्यार्थे- "अथातो ब्रह्मजिज्ञासा" (ब्रह्मसूत्रम्, १.१.१); "अथ प्रजानामधिपः प्रभाते.." (रघुवंशम्, २.१)
कल्पनार्थे- "अथ कौतुकमावेदयामि" (कादम्बरी, १४४); "अथ मरणवश्यमेव जन्तोः किमिति" (वेणीसंहारम् ४)
प्रश्नार्थे- "अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी" (अभिज्ञानशाकुन्तलम् ७.२०)
कात्स्न्यार्थे- "अथातो धर्मं व्याख्यास्यामः"।
सन्देहार्थे- "शब्दो नित्योऽथानित्यः"।
समुच्चयार्थे- "भीमोऽथार्ज्जुनः"।
११. तत्र अथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात्।
-ब्रह्मसूत्रशाङ्करभाष्यम्, १.१.१
१२. अथशब्दस्य मङ्गलं तु नास्यार्थः किन्तु अर्थान्तरप्रयुक्तोऽप्ययं श्रुत्वा मङ्गलसाधनं भवति।

१३. ''मङ्गलस्य च वाक्यार्थे समन्वयाभावात्'' - ब्रह्मसूत्रशाङ्करभाष्यम्, १.१.१

१४. ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥ इति स्मृतिः ।

१५. आपस्तम्बश्रौतसूत्रम्, २४.२

१६. ब्रह्मसूत्रशाङ्करभाष्य-भामतीव्याख्यानम्, १.१.१ पृ. ८३

१७. श्रुतं च दृष्टवत् दुष्टं स्पर्द्धाऽसूयात्ययव्ययैः । बह्वन्तरायकामत्वात् कृषिवच्चापि निष्फलम् ॥ -भागवतपुराणम्, ११.३.२०

१८. छान्दोग्योपनिषत्, ८.१.६

१९. तैत्तिरीयोपनिषत्, २.१.१

२०. साधनान्यत्र चत्वारि कथितानि मनीषिभिः । येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति ॥ - विवेकचूडामणिः १८

२१. अयं विवेकः दृष्ट्-दृश्यविवेकः, नित्यानित्यवस्तुविवेकः, सदसत्-विवेकः, कार्य-कारणविवेकः, सुख-दुःखविवेकः, अधिष्ठान-अध्यस्तविवेकादिरूपेण कर्तुं शक्यते ।

२२. वेदान्तविद्याधिगमे प्रक्रियाभेदेन प्रस्थानद्वयमस्ति-विवरणप्रस्थानं भामतीप्रस्थानं च । विवरणप्रस्थानानुसारं श्रवणमात्रेण ब्रह्मज्ञानं भवति, अतः तस्मिन् प्रस्थाने विवेकान्तर्गते सदसद्विवेकः, कार्यकारणविवेकः स्वीक्रियते । किन्तु भामतीप्रस्थानानुसारं श्रवणानन्तरं मनन-निदिध्यासनेन ब्रह्मज्ञानं भवति, अतस्तत्र विवेकान्तर्गते नित्यानित्यवस्तुविवेकः इत्येव स्वीक्रियते ।

२३. ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्यानम्, १.१.१ पृ. ८३

२४. वेदान्तसारः, खण्डः ४

२५. मुण्डकोपनिषत्, १.१.६

२६. कठोपनिषत्, १.२.१८

२७. वेदान्तसारविद्वन्मनोरञ्जनी, पृ. ७८

२८. श्रीमद्भगवद्गीता, २.२४

२९. बृहदारण्यकोपनिषत्, ४.४.१९

३०. बृहदारण्यकोपनिषत्, ३.४.२

३१. वेदान्तसारः

३२. श्रीमद्भगवद्गीता शाङ्करभाष्यम्, १८.५२

३३. शतपथब्राह्मणम्, २.६.३.१

३४. ऋग्वेदः, ८.४८.३

३५. अमृता इत्यत्र हि नञोऽल्पत्वमर्थः अनुदरा कन्या इति यथा । ततश्च अल्पं=मनुष्यापेक्षया न्यूनं मृतं=मरणं येषां ते अमृताः=चिरकालस्थायिन इति तदर्थः ।

३६. श्रीमद्भगवद्गीता, ९.२१

३७. विष्णुपुराणम्, २.५.९६



३८. वेदान्तसार-विद्वन्मनोरञ्जनी, पृ. ७९

३९. महाभारतम्, १२.१७७

४०. ''शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येव आत्मानं पश्येत्'' - बृहदारण्यकोपनिषत्, ४.४.२३

४१. विवेकचूडामणिः, २२

४२. अत्र ब्रह्मसूत्रभामतीव्याख्यानं दर्शनीयम् - ''रागादिकषायमदिरामत्तं हि मनस्तेषु तेषु विषयेषूच्चावचमिन्द्रियाणि प्रवर्तयत्, विविधाश्च प्रवृत्तीः पुण्यापुण्यफला भावयत्, पुरुषमतिघोरे विविधदुःखज्वालाजटिले संसारहुतभुजि जुहोति ।
प्रसंख्यानाभ्यासलब्धवैराग्यपरिपाकभग्नरागादिकषायमदिरामदं तु मनः पुरुषेणावजीयते वशीक्रियते, सोऽयमस्य वैराग्यहेतको मनोविजयः शमः'' इति ।
- ब्रह्मसूत्रभामतीव्याख्यानम्, १.१.१ पृ. ७३

४३. श्रीमद्भगवद्गीता, ६.३४-३५

४४. अत्र ब्रह्मसूत्रभामतीव्याख्यानम् - ''विजितं च मनस्तत्त्वविषयविनियोगयोग्यतां नीयते, सेयमस्य योग्यता दमः । यथा दान्तोऽयं वृषभयुवा हलशकटादिवहनयोग्यः कृत इति गम्यते'' ।
- ब्रह्मसूत्रभामतीव्याख्यानम्, १.१.१ पृ. ७३

४५. विवेकचूडामणिः, २३

४६. ''यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥
- श्रीमद्भगवद्गीता, २.६०
''यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता''॥
- श्रीमद्भगवद्गीता, २.५८

४७. कठोपनिषत्, १.३.३-९

४८. महाभारतम्, शा.प., १५८.९

४९. जाबालोपनिषत्, ४

५०. मनुस्मृतिः, ६.३८

५१. श्रीमद्भगवद्गीता, १८.४९

५२. उपदेशसाहस्री, १८.२२२

५३. वेदान्तसारः पृ. १२

५४. ''सहनं सर्वदुःखानामप्रतीकारपूर्वकम् । चिन्ताविलापरहितं सा तितिक्षा निगद्यते''॥
- विवेकचूडामणिः, २५

५५. श्रीमद्भगवद्गीता, २.१४

५६. श्रीमद्भगवद्गीता, ९.३

५७. ''श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः । ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति''॥
- श्रीमद्भगवद्गीता, ४.३९

५८. विवेकचूडामणिः, २६

५९. विवेकचूडामणिः, २७

६०. श्रीमद्भगवद्गीता, ६.२६

६१. कठोपनिषत्, १..२.२४

६२. वेदान्तसार-विद्वन्मनोरञ्जनी, पृ. ८१

६३. विवेकचूडामणिः, २८

६४. ''ईश्वरानुग्राहादेव पुंसामद्वैतवासना। महाभयपरित्राणा द्वित्रीणामुपजायते''॥ - अवधूतगीता, १.१

६५. ''विश्वं शतं सहस्रं च सर्वमक्षयवाचकम्'' इति महाभारतवचनात् (१.१२७.८) सहस्रपदम् आनन्त्यपरम् ।

६६. ''मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः''॥
- भगवद्गीता, ७.३

६७. ''वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते। तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः''॥
- विवेकचूडामणिः, ३०

***